अच्युताष्टकं

अच्युताष्टकं

अच्युतं केशवं रामनारायणं
कृष्णदामोदरं वासुदेवं हरिम् |
श्रीधरं माधवं गोपिकावल्लभं
जानकीनायकं रामचंद्रं भजे || 1 ||

अच्युतं केशवं सत्यभामाधवं
माधवं श्रीधरं राधिकाराधितम् |
इंदिरामंदिरं चेतसा सुंदरं
देवकीनंदनं नंदजं संदधे || 2 ||

विष्णवे जिष्णवे शंखिने चक्रिणे
रुक्मिणीरागिणे जानकीजानये |
वल्लवीवल्लभायार्चितायात्मने
कंसविध्वंसिने वंशिने ते नमः || 3 ||

कृष्ण गोविंद हे राम नारायण
श्रीपते वासुदेवाजित श्रीनिधे |
अच्युतानंत हे माधवाधोक्षज
द्वारकानायक द्रौपदीरक्षक || 4 ||

राक्षसक्षोभितः सीतया शोभितो
दंडकारण्यभूपुण्यताकारणम् |
लक्ष्मणेनान्वितो वानरैः सेवितो-
-ऽगस्त्यसंपूजितो राघवः पातु माम् || 5 ||

धेनुकारिष्टहाऽनिष्टकृद्द्वेषिणां
केशिहा कंसहृद्वंशिकावादकः |
पूतनाकोपकः सूरजाखेलनो
बालगोपालकः पातु मां सर्वदा || 6 ||

विद्युदुद्योतवत्प्रस्फुरद्वाससं
प्रावृडंभोदवत्प्रोल्लसद्विग्रहम् |
वन्यया मालया शोभितोरःस्थलं
लोहितांघ्रिद्वयं वारिजाक्षं भजे || 7 ||

कुंचितैः कुंतलैर्भ्राजमाननं
रत्नमौळिं लसत्कुंडलं गंडयोः |
हारकेयूरकं कंकणप्रोज्ज्वलं
किंकिणीमंजुलं श्यामलं तं भजे || 8 ||

अच्युतस्याष्टकं यः पठेदिष्टदं
प्रेमतः प्रत्यहं पूरुषः सस्पृहम् |
वृत्ततः सुंदरं वेद्यविश्वंभरं
तस्य वश्यो हरिर्जायते सत्वरम् || 9 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्री अच्युताष्टकम् ||